# Shrirama Puja

# શ્રીરામપૂજા

## Document Information

Text title : Shrirama Puja

File name : shrIrAmapUjA.itx

Category : raama, pUjA

Location : doc_raama

Proofread by : Rajesh Thyagarajan

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

Shrirama Puja

# શ્રીરામપૂજા

The prana pratishtha at the mula sthanam of the Rama Janma Bhumi at Ayodhya took place as a grand celebration on the current Svastishri Shobhana year Pausha Shukla Dvadashi, Soma Mrigashirsha Amrita Siddhi Yoga Punya Kala (2024 Jan 22).

This simple puja paddhati was published to help devotees to worship Bhagavan Shrirama in their individual places on this auspicious occasion. The pUjA can even be performed any time with slight modification. If not elaborate pUjA, this can be chanted while visiting Ayoddhya bAlarAma Mandir.

શ્રીગણેશાય નમઃ ।
શ્રીવેદવ્યાસાય નમઃ ।
ॐ

## ॥ પ્રધાનપૂજા ॥

(આચમ્ય)
(પ્રાણાન્ આયમ્ય । વિઘ્નેશ્વર-પૂજાં કૃત્વા ।)

### સઙ્કલ્પઃ

મમોપાત્ત-સમસ્ત-દુરિત-ક્ષય-દ્વારા શ્રી પરમેશ્વર-પ્રીત્યર્થં શુભે શોભને મુહૂર્તે અદ્ય બ્રહ્મણઃ દ્વિતીય-પરાર્ધે શ્વેતવરાહ-કલ્પે વૈવસ્વત મન્વન્તરે અષ્ટાવિંશતિતમે કલિ-યુગે પ્રથમે પાદે જમ્બૂ-દ્વીપે ભારત-વર્ષે ભરત-ખણ્ડે મેરોઃ દક્ષિણે પાર્શ્વે અસ્મિન્ વર્તમાને વ્યાવહારિકાણાં પ્રભવાદીનાં ષષ્ટ્યાઃ સંવત્સરાણાં મધ્યે શોભન-નામ-સંવત્સરે ઉત્તરાયણે સૌર-માનેન મકર-માસે ચાન્દ્ર-માનેન પૌષ-માસે શુક્લ-પક્ષે દ્વાદશ્યાં શુભ-તિથૌ ઇન્દુ-વાસર-યુક્તાયાં મૃગશીર્ષ-નક્ષત્ર-યુક્તાયાં બ્રાહ્મ-(૦૮:૪૩, માહેન્દ્ર)-યોગ-બવ-(૦૭:૩૭, બાલવ)-કરણ-યુક્તાયાં એવં ગુણ-વિશેષણ-વિશિષ્ટાયાં અસ્યાં દ્વાદશ્યાં શુભ-તિથૌ
– અયોધ્યાયાં પ્રવર્તમાનસ્ય ભગવતઃ શ્રીરામસ્ય જન્મ ભૂમિ-મન્દિરસ્ય મૂલ-સ્થાન-પ્રાણ-પ્રતિષ્ઠાયાઃ નિર્વિઘ્નતયા પરિપૂર્તિ-સિદ્ધ્યર્થં

– મૂલ-સ્થાનં પરિતઃ મહતઃ મન્દિર પરિસરસ્ય સમ્યગ્ અભિવૃદ્ધિ-વ્યવસ્થાપન-સિદ્ધ્યર્થં

– ભક્ત-કોટિભિઃ અયોધ્યાં ગત્વા હર્ષેણ ભગવતઃ શ્રીરામસ્ય દર્શન-પ્રાપ્ત્યર્થં

– વૈદિકસ્ય અસ્માકં સનાતન ધર્મસ્ય સર્વત્ર અભિવૃદ્ધ્યર્થં, તદ્-વિરોધિનાં ઉપશમનાર્થં, તદનુસારિણાં સર્વવિધ-યોગ-ક્ષેમ-અભિવૃદ્ધ્યર્થં,

– વિભિન્ન-સમ્પ્રદાય-સ્થાનાં સનાતન ધર્માવલમ્બિનાં પરસ્પરં સમન્વયેન અવિરોધેન સાધન-અનુષ્ઠાનેન ફલ-સિદ્ધ્યર્થં

– અસ્માકં સહ-કુટુમ્બાનાં ક્ષેમ-સ્થૈર્ય-ધૈર્ય-વીર્ય-વિજય-આયુઃ-આરોગ્ય-ઐશ્વર્યાણાં અભિવૃદ્ધ્યર્થં ધર્માર્થ-કામ-મોક્ષ-ચતુર્વિધ પુરુષાર્થ-સિદ્ધ્યર્થં

– વિશેષતઃ ભારતીય-સત્-સન્તાન-સમૃદ્ધ્યર્થં

– સર્વત્ર રામ-નામ-મહિમ્નઃ રામ-રાજ્યસ્ય ચ પ્રસારાર્થં

– શ્રી-સીતા-લક્ષ્મણ-ભરત-શત્રુઘ્ન-હનુમત્-સમેત-શ્રી-રામચન્દ્ર-પ્રીત્યર્થં

અયોધ્યા રામજન્મભૂમિ-મૂલસ્થાન-પ્રાણ-પ્રતિષ્ઠા-પુણ્ય-કાલે યથાશક્તિ સમ્પાદિતૈઃ ઉપચારૈઃ
શ્રી-રામચન્દ્ર-પૂજાં કરિષ્યે ।
વિઘ્નેશ્વરં ઉદ્વાસ્ય
(કલશપૂજાં કૃત્વા ।)
ધ્યાનં -
વૈદેહી-સહિતં સુર-દ્રુમ-તલે હૈમે મહામણ્ડપે
મધ્યેપુષ્પકમાસને મણિમયે વીરાસને સુસ્થિતમ્ ।
અગ્રે વાચયતિ પ્રભઞ્જન-સુતે તત્ત્વં મુનિભ્યઃ પરં
વ્યાખ્યાન્તં ભરતાદિભિઃ પરિવૃતં રામં ભજે શ્યામલમ્ ॥

વામે ભૂમિ-સુતા પુરશ્ચ હનુમાન્ પશ્ચાત્ સુમિત્રા-સુતઃ
શત્રુઘ્નો ભરતશ્ચ પાર્શ્વ-દલયોર્-વાય્વાદિ-કોણેષુ ચ ।
સુગ્રીવશ્ચ વિભીષણશ્ચ યુવરાટ્ તારા-સુતો જામ્બવાન્
મધ્યે નીલ-સરોજ-કોમલ-રુચિં રામં ભજે શ્યામલમ્ ॥

શ્રી-સીતા-લક્ષ્મણ-ભરત-શત્રુઘ્ન-હનુમત્-સમેત-શ્રી-રામચન્દ્રં ધ્યાયામિ ।
આવાહયામિ વિશ્વેશં વૈદેહી-વલ્લભં વિભુમ્ ।
કૌસલ્યા-તનયં વિષ્ણું શ્રી-રામં પ્રકૃતેઃ પરમ્ ॥

શ્રીરામાય નમઃ -આવાહયામિ ।
વામે સીતાં આવાહયામિ ।
પુરસ્તાત્ હનુમન્તં આવાહયામિ ।

પશ્ચાત્ લક્ષ્મણં આવાહયામિ ।
ઉત્તરસ્યાં શત્રુઘ્નમવાહયામિ ।
દક્ષિણસ્યાં દિશિ ભરતં આવાહયામિ ।
વાયવ્યાયાં સુગ્રીવં આવાહયામિ ।
ઐશાન્યાં વિભીષણં આવાહયામિ ।
આગ્નેય્યાં અઙ્ગદં આવાહયામિ ।
નૈરૃત્યાં જામ્બવન્તં આવાહયામિ ॥

રત્ન-સિંહાસનારૂઢ સર્વ-ભૂપાલ -વન્દિત ।
આસનં તે મયા દત્તં પ્રીતિં જનયતુ પ્રભો ॥

સપરિવારાય શ્રીરામાય નમઃ-આસનં સમર્પયામિ ।
પાદાઙ્ગુષ્ઠ-સમુદ્ભૂત-ગઙ્ગા-પાવિત-વિષ્ટપ ।
પાદ્યાર્થમુદકં રામ દદામિ પરિગૃહ્યતામ્ ॥

સપરિવારાય શ્રીરામાય નમઃ-પાદ્યં સમર્પયામિ ।
વાલખિલ્યાદિભિર્-વિપ્રૈસ્-ત્રિસન્ધ્યં પ્રયતાત્મભિઃ ।
અર્ઘ્યૈઃ આરાધિત વિભો મમાર્ઘ્યં રામ ગૃહ્યતામ્ ॥

સપરિવારાય શ્રીરામાય નમઃ-અર્ઘ્યં સમર્પયામિ ।
આચાન્તામ્ભોધિના રામ મુનિના પરિસેવિત ।
મયા દત્તેન તોયેન કુર્વાચમનમીશ્વર ॥

સપરિવારાય શ્રીરામાય નમઃ-આચમનીયં સમર્પયામિ ।
નમઃ શ્રી-વાસુદેવાય તત્ત્વ-જ્ઞાન-સ્વરૂપિણે ।
મધુપર્કં ગૃહાણેમં જાનકીપતયે નમઃ ॥

સપરિવારાય શ્રીરામાય નમઃ-મધુપર્કં સમર્પયામિ ।
કામધેનુ-સમુદ્ભૂત-ક્ષીરેણેન્દ્રેણ રાઘવ।
અભિષિક્ત અખિલાર્થાય્યૈ સ્નાહિ મદ્-દત્ત-દુગ્ધતઃ ॥

સપરિવારાય શ્રીરામાય નમઃ-ક્ષીરાભિષેકં સમર્પયામિ ।
હનૂમતા મધુવોદ્ભુતેન મધુના પ્રભો ।
પ્રીત્યાઽભિષેચિત-તનો મધુના સ્નાહિ મેઽદ્ય ભોઃ ॥

સપરિવારાય શ્રીરામાય નમઃ-મધ્વભિષેકં સમર્પયામિ ।
ત્રૈલોક્ય-તાપ-હરણ-નામ-કીર્તન રાઘવ ।

મધૂત્થ-તાપ-શાન્ત્યર્થં સ્નાહિ ક્ષીરેણ વૈ પુનઃ ॥

સપરિવારાય શ્રીરામાય નમઃ-
મધ્વભિષેકાન્તે પુનઃ ક્ષીરાભિષેકં સમર્પયામિ ।
નદી-નદ-સમુદ્રાદિ-તોયૈર્-મન્ત્રાભિસંસ્કૃતૈઃ ।
પટ્ટાભિષિક્ત રાજેન્દ્ર સ્નાહિ શુદ્ધ-જલેન મે ॥

સપરિવારાય શ્રીરામાય નમઃ-શુદ્ધોદક સ્નાનં સમર્પયામિ ।
સ્નાનોત્તરં આચમનીયં સમર્પયામિ ।
હિત્વા પીતામ્બરં ચીર-કૃષ્ણાજિન-ધરાચ્યુત ।
પરિધત્સ્વાદ્ય મે વસ્ત્રં સ્વર્ણ-સૂત્ર-વિનિર્મિતમ્ ॥

સપરિવારાય શ્રીરામાય નમઃ-વસ્ત્રં સમર્પયામિ ।
રાજર્ષિ-વંશ-તિલક રામચન્દ્ર નમોઽસ્તુ તે ।
યજ્ઞોપવીતં વિધિના નિર્મિતં ધત્સ્વ મે પ્રભો ॥

સપરિવારાય શ્રીરામાય નમઃ-ઉપવીતં સમર્પયામિ ।
કિરીટાદીનિ રાજેન્દ્ર હંસકાન્તાનિ રાઘવ ।
વિભૂષણાનિ ધૃત્વાઽદ્ય શોભસ્વ સહ સીતયા ॥

સપરિવારાય શ્રીરામાય નમઃ-આભરણં સમર્પયામિ ।
સન્ધ્યા-સમાન-રુચિના નીલાભ્ર-સમ-વિગ્રહ ।
લિમ્પામિ તેઽઙ્ગકં રામ ચન્દનેન મુદા હૃદિ ॥

સપરિવારાય શ્રીરામાય નમઃ-ગન્ધાન્ ધારયામિ ।
ગન્ધસ્યોપરિ હરિદ્રા-કુઙ્કુમં સમર્પયામિ ।
અક્ષતાન્ કુઙ્કુમોન્મિશ્રાન્ અક્ષય્ય-ફલ-દાયક ।
અર્પયે તવ પાદાબ્જે શાલિ-તણ્ડુલ-સમ્ભવાન્ ॥

સપરિવારાય શ્રીરામાય નમઃ-અક્ષતાન્ સમર્પયામિ ।
ચમ્પકાશોક-પુન્નાગૈર્-જલજૈસ્-તુલસી-દલૈઃ ।
પૂજયામિ રઘૂત્તંસ પૂજ્યં ત્વાં સનકાદિભિઃ ॥

સપરિવારાય શ્રીરામાય નમઃ-પુષ્પાણિ સમર્પયામિ ।

## અઙ્ગ-ગુણ-પૂજા

અહલ્યા-ઉદ્ધારકાય નમઃ પાદ-રજઃ પૂજયામિ
શરણાગત-રક્ષકાય નમઃ પાદ-કાન્તિં પૂજયામિ
ગઙ્ગા-નદી-પ્રવર્તન-પરાય નમઃ પાદ-નખાન્ પૂજયામિ
સીતા-સંવાહિત-પદાય નમઃ પાદ-તલં પૂજયામિ
દુન્દુભિ-કાય -વિક્ષેપકાય નમઃ પાદાઙ્ગુષ્ઠં પૂજયામિ
વિનત-કલ્પ-દ્રુમાય નમઃ ગુલ્ફૌ પૂજયામિ
દણ્ડકારણ્ય-ગમન-જઙ્ઘાલાય નમઃ જઙ્ઘે પૂજયામિ
જાનુ-ન્યસ્ત-કરામ્બુજાય નમઃ જાનુની પૂજયામિ
વીરાસન-અધ્યાસિને નમઃ ઊરૂ પૂજયામિ
પીતામ્બર-અલઙ્કૃતાય નમઃ કટિં પૂજયામિ
આકાશ-મધ્યગાય નમઃ મધ્યં પૂજયામિ
અરિ-નિગ્રહ-પરાય નમઃ કટિ-લમ્બિતં અસિં પૂજયામિ
અબ્ધિ-મેખલા-પતયે નમઃ મધ્ય-લમ્બિત-મેખલા-દામ પૂજયામિ
ઉદર-સ્થિત-બ્રહ્માણ્ડાય નમઃ ઉદરં પૂજયામિ
જગત્-ત્રય-ગુરવે નમઃ વલિ-ત્રયં પૂજયામિ
સીતાનુલેપિત-કાશ્મીર-ચન્દનાય નમઃ વક્ષઃ પૂજયામિ
અભય-પ્રદાન-શૌણ્ડાય નમઃ દક્ષિણ-બાહુ-દણ્ડં પૂજયામિ
વિતરણ-જિત-કલ્પદ્રુમાય નમઃ દક્ષિણ-કર-તલં પૂજયામિ
આશર-નિરસન-પરાય નમઃ દક્ષિણ-કર-સ્થિત-શરં પૂજયામિ
જ્ઞાન-વિજ્ઞાન-ભાસકાય નમઃ ચિન્મુદ્રાં પૂજયામિ
મુનિ-સઙ્ઘાર્પિત -દિવ્ય-પદાય નમઃ વામ-ભુજ-દણ્ડં પૂજયામિ
દશાનન-કાલ-રૂપિણે નમઃ વામ -હસ્ત-સ્થિત-કોદણ્ડં પૂજયામિ
શત-મખ-દત્ત-શત-પુષ્કર-સ્રજે નમઃ અંસૌ પૂજયામિ
કૃત્ત-દશાનન-કિરીટ-કૂટાય નમઃ અંસ-લમ્બિત-નિષઙ્ગ-દ્વયં પૂજયામિ
સીતા-બાહુ-લતાલિઙ્ગિતાય નમઃ કણ્ઠં પૂજયામિ
સ્મિત-ભાષિણે નમઃ સ્મિતં પૂજયામિ
નિત્ય-પ્રસન્નાય નમઃ મુખ-પ્રસાદં પૂજયામિ
સત્ય-વાચે નમઃ વાચં પૂજયામિ
કપાલિ-પૂજિતાય નમઃ કપોલૌ પૂજયામિ
ચક્ષુઃશ્રવઃ-પ્રભુ-પૂજિતાય નમઃ શ્રોત્રે પૂજયામિ

અનાસાદિત-પાપ-ગન્ધાય નમઃ   ઘ્રાણં પૂજયામિ
પુણ્ડરીકાક્ષાય નમઃ    અક્ષિણી પૂજયામિ
અપાઙ્ગ-સ્યન્દિ-કરુણાય નમઃ  અરુણાપાઙ્ગ-દ્વયં પૂજયામિ
વિના-કૃત-રુષે નમઃ   અનાથ-રક્ષક-કટાક્ષં પૂજયામિ
કસ્તૂરી-તિલકાઙ્કિતાય નમઃ  ફાલં પૂજયામિ
રાજાધિરાજ-વેષાય નમઃ  કિરીટં પૂજયામિ
મુનિ-મણ્ડલ-પૂજિતાય નમઃ   જટા-મણ્ડલં પૂજયામિ
મોહિત-મુનિ-જનાય નમઃ   પુંસાં મોહનં રૂપં પૂજયામિ
જાનકી–વ્યજન-વીજિતાય નમઃ    વિદ્યુદ્-વિદ્યોતિત-કાલાભ્ર-સદૃશ-કાન્તિં   પૂજયામિ
હનુમદર્પિત-ચૂડામણયે નમઃ   કરુણારસ-ઉદ્વેલ્લિત-કટાક્ષ-ધારાં પૂજયામિ
સુમન્ત્રાનુગ્રહ-પરાય નમઃ   તેજોમયરૂપં પૂજયામિ
કમ્પિતામ્ભોધયે નમઃ  આહાર્ય-કોપં પૂજયામિ
તિરસ્કૃત-લઙ્કેશ્વરાય નમઃ  ધૈર્યં પૂજયામિ
વન્દિત-જનકાય નમઃ   વિનયં પૂજયામિ
સમ્માનિત-ત્રિજટાય નમઃ  અતિમાનુષ-સૌલભ્યં પૂજયામિ
ગન્ધર્વ-રાજ-પ્રતિમાય નમઃ   લોકોત્તર-સૌન્દર્યં પૂજયામિ
અસહાય-હત-ખર-દૂષણાદિ-ચતુર્દશ-સહસ્ર-રાક્ષસાય નમઃ   પરાક્રમં પૂજયામિ
આલિઙ્ગિત આઞ્જનેયાય નમઃ   ભક્ત-વાત્સલ્યં પૂજયામિ
લબ્ધ-રાજ્ય-પરિત્યત્રે નમઃ    ધર્મં પૂજયામિ
દર્ભ-શાયિને નમઃ    લોકાનુવર્તનં પૂજયામિ
સર્વેશ્વરાય નમઃ    સર્વાણ્યઙ્ગાનિ સર્વાંશ્ચ ગુણાન્ પૂજયામિ ॥

## ॥ અથ શ્રીરામાષ્ટોત્તરશતનામાવલિઃ ॥

રામાય નમઃ ।
રાવણ-સંહાર-કૃત-માનુષ-વિગ્રહાય નમઃ ।
કૌસલ્યા-સુકૃત-વ્રાત-ફલાય નમઃ ।
દશરથાત્મજાય નમઃ ।
લક્ષ્મણાર્ચિત-પાદાબ્જાય નમઃ ।
સર્વ-લોક-પ્રિયઙ્કરાય નમઃ ।
સાકેત-વાસિ-નેત્રાબ્જ-સમ્પ્રીણન-દિવાકરાય નમઃ ।
વિશ્વામિત્ર-પ્રિયાય નમઃ ।

શાન્તાય નમઃ ।
તાટકા-ધ્વાન્ત-ભાસ્કરાય નમઃ । ૧૦
સુબાહુ-રાક્ષસ-રિપવે નમઃ ।
કૌશિકાધ્વર-પાલકાય નમઃ ।
અહલ્યા-પાપ-સંહર્ત્રે નમઃ ।
જનકેન્દ્ર-પ્રિયાતિથયે નમઃ ।
પુરારિ-ચાપ-દલનાય નમઃ ।
વીર-લક્ષ્મી-સમાશ્રયાય નમઃ ।
સીતા-વરણ-માલ્યાઢ્યાય નમઃ ।
જામદગ્ન્ય-મદાપહાય નમઃ ।
વૈદેહી-કૃત-શ‍ૃઙ્ગારાય નમઃ ।
પિતૃ-પ્રીતિ-વિવર્ધનાય નમઃ । ૨૦
તાતાજ્ઞોત્સૃષ્ટ-હસ્ત-સ્થ-રાજ્યાય નમઃ ।
સત્ય-પ્રતિશ્રવાય નમઃ ।
તમસા-તીર-સંવાસિને નમઃ ।
ગુહાનુગ્રહ-તત્પરાય નમઃ ।
સુમન્ત્ર-સેવિત-પદાય નમઃ ।
ભરદ્વાજ-પ્રિયાતિથયે નમઃ ।
ચિત્રકૂટ-પ્રિય-સ્થાનાય નમઃ ।
પાદુકા-ન્યસ્ત-ભૂ-ભરાય નમઃ ।
અનસૂયા-અઙ્ગરાગાઙ્ક-સીતા-સાહિત્ય-શોભિતાય નમઃ ।
દણ્ડકારણ્ય-સઞ્ચારિણે નમઃ । ૩૦
વિરાધ-સ્વર્ગ–દાયકાય નમઃ ।
રક્ષઃ-કાલાન્તકાય નમઃ ।
સર્વ-મુનિ-સઙ્ઘ-મુદાવહાય નમઃ ।
પ્રતિજ્ઞાત-આશર-વધાય નમઃ ।
શરભઙ્ગ-ગતિ-પ્રદાય નમઃ ।
અગસ્ત્યાર્પિત-બાણાસ-ખડ્ગ-તૂણીર-મણ્ડિતાય નમઃ ।
પ્રાપ્ત-પઞ્ચવટી-વાસાય નમઃ ।
ગૃધ્રરાજ-સહાયવતે નમઃ ।
કામિ-શૂર્પણખા -કર્ણ-નાસ-ચ્છેદ-નિયામકાય નમઃ ।
ખરાદિ-રાક્ષસ-વ્રાતખણ્ડનાવિતસજ્જનાય નમઃ । ૪૦

સીતા-સંશ્લિષ્ટ-કાયાભા-જિત-વિદ્યુદ્-યુતામ્બુદાય નમઃ ।
મારીચ-હન્ત્રે નમઃ ।
માયાઢ્યાય નમઃ ।
જટાયુર્-મોક્ષ-દાયકાય નમઃ ।
કબન્ધ-બાહુ-લવનાય નમઃ ।
શબરી-પ્રાર્થિતાતિથયે નમઃ ।
હનુમદ્-વન્દિત-પદાય નમઃ ।
સુગ્રીવ-સુહૃદેઽવ્યયાય નમઃ ।
દૈત્ય-કઙ્કાલ-વિક્ષેપિણે નમઃ ।
સપ્ત-સાલ-પ્રભેદકાય નમઃ । ૫૦
એકેષુ-હત-વાલિને નમઃ ।
તારા-સંસ્તુત-સદ્ગુણાય નમઃ ।
કપીન્દ્રી-કૃત-સુગ્રીવાય નમઃ ।
સર્વ-વાનર-પૂજિતાય નમઃ ।
વાયુ-સૂનુ-સમાનીત-સીતા-સન્દેશ-નન્દિતાય નમઃ ।
જૈત્ર-યાત્રોદ્યતાય નમઃ ।
જિષ્ણવે નમઃ ।
વિષ્ણુ-રૂપાય નમઃ ।
નિરાકૃતયે નમઃ ।
કમ્પિતામ્ભોનિધયે નમઃ । ૬૦
સમ્પત્-પ્રદાય નમઃ ।
સેતુ-નિબન્ધનાય નમઃ ।
લઙ્કા-વિભેદન-પટવે નમઃ ।
નિશાચર-વિનાશકાય નમઃ ।
કુમ્ભકર્ણાખ્ય-કુમ્ભીન્દ્ર-મૃગરાજ-પરાક્રમાય નમઃ ।
મેઘનાદ-વધોદ્યુક્ત-લક્ષ્મણાસ્ત્ર-બલપ્રદાય નમઃ ।
દશગ્રીવાન્ધતામિસ્ર-પ્રમાપણ-પ્રભાકરાય નમઃ ।
ઇન્દ્રાદિ-દેવતા-સ્તુત્યાય નમઃ ।
ચન્દ્રાભ-મુખ-મણ્ડલાય નમઃ ।
વિભીષણાર્પિત-નિશાચર-રાજ્યાય નમઃ । ૭૦
વૃષ-પ્રિયાય નમઃ ।
વૈશ્વાનર-સ્તુત-ગુણાવનિપુત્રી-સમાગતાય નમઃ ।

પુષ્પક-સ્થાન-સુભગાય નમઃ ।

પુણ્યવત્-પ્રાપ્ય-દર્શનાય નમઃ ।

રાજ્યાભિષિક્તાય નમઃ ।

રાજેન્દ્રાય નમઃ ।

રાજીવ-સદૃશેક્ષણાય નમઃ ।

લોક-તાપાપહર્ત્રે નમઃ ।

ધર્મ-સંસ્થાપનોદ્યતાય નમઃ ।

શરણ્યાય નમઃ । ૮૦

કીર્તિમતે નમઃ ।

નિત્યાય વદાન્યાય નમઃ ।

કરુણાર્ણવાય નમઃ ।

સંસાર-સિન્ધુ-સમ્મગ્ન-તારકાખ્યા-મહોજ્જ્વલાય નમઃ ।

મધુરાય નમઃ ।

મધુરોક્તયે નમઃ ।

મધુરા-નાયકાગ્રજાય નમઃ ।

શમ્બૂક-દત્ત-સ્વર્લોકાય નમઃ ।

શમ્બરારાતિ-સુન્દરાય નમઃ ।

અશ્વમેધ-મહાયાજિને નમઃ । ૯૦

વાલ્મીકિ-પ્રીતિમતે નમઃ ।

વશિને નમઃ ।

સ્વયં રામાયણ-શ્રોત્રે નમઃ ।

પુત્ર-પ્રાપ્તિ-પ્રમોદિતાય નમઃ ।

બ્રહ્માદિ-સ્તુત-માહાત્મ્યાય નમઃ ।

બ્રહ્મર્ષિ-ગણ-પૂજિતાય નમઃ ।

વર્ણાશ્રમ-રતાય નમઃ ।

વર્ણાશ્રમ-ધર્મ-નિયામકાય નમઃ ।

રક્ષા-પરાય નમઃ ।

રાજ-વંશ-પ્રતિષ્ઠાપન-તત્પરાય નમઃ । ૧૦૦

ગન્ધર્વ-હિંસા-સંહારિણે નમઃ ।

ધૃતિમતે નમઃ ।

દીન-વત્સલાય નમઃ ।

જ્ઞાનોપદેષ્ટ્રે નમઃ ।

વેદાન્ત-વેદ્યાય નમઃ ।
ભક્ત-પ્રિયઙ્કરાય નમઃ ।
વૈકુણ્ઠ-વાસિને નમઃ ।
ચરાચર-વિમુક્તિ-દાય નમઃ । ૧૦૮

॥ ઇતિ બ્રહ્મયામલે રામરહસ્યે પ્રોક્તા શ્રી-રામ-અષ્ટોત્તરશત-નામાવલિઃ સમ્પૂર્ણા ।

## ॥ અથ શ્રી સીતાષ્ટોત્તરશત-નામાવલિઃ ॥

સીતાયૈ નમઃ ।
સીર-ધ્વજ-સુતાયૈ નમઃ ।
સીમાતીત-ગુણોજ્જ્વલાયૈ નમઃ ।
સૌન્દર્ય-સાર-સર્વસ્વ ભૂતાયૈ નમઃ ।
સૌભાગ્ય-દાયિન્યૈ નમઃ ।
દેવ્યૈ નમઃ ।
દેવાર્ચિત-પદાયૈ નમઃ ।
દિવ્યાયૈ નમઃ ।
દશરથ-સ્નુષાયૈ નમઃ ।
રામાયૈ નમઃ ।
રામ-પ્રિયાયૈ નમઃ ।
રમ્યાયૈ નમઃ ।
રાકેન્દુ-વદનોજ્જ્વલાયૈ નમઃ ।
વીર્ય-શુલ્કાયૈ નમઃ ।
વીર-પત્ન્યૈ નમઃ ।
વિયન્મધ્યાયૈ નમઃ ।
વર-પ્રદાયૈ નમઃ ।
પતિ-વ્રતાયૈ નમઃ ।
પઙ્ક્તિ-કણ્ઠ-નાશિન્યૈ નમઃ ।
પાવન-સ્મૃતયે નમઃ ।
વન્દારુ-વત્સલાયૈ નમઃ ।
વીર-માત્રે નમઃ ।
વૃત-રઘૂત્તમાયૈ નમઃ ।
સમ્પત્-કર્યૈ નમઃ ।

સદા-તુષ્ટાયૈ નમઃ ।

સાક્ષિણ્યૈ નમઃ ।

સાધુ-સમ્મતાયૈ નમઃ ।

નિત્યાયૈ નમઃ ।

નિયત-સંસ્થાનાયૈ નમઃ ।

નિત્યાનન્દાયૈ નમઃ ।

નુતિ-પ્રિયાયૈ નમઃ ।

પૃથ્વ્યૈ નમઃ ।

પૃથ્વી સુતાયૈ નમઃ ।

પુત્ર-દાયિન્યૈ નમઃ ।

પ્રકૃત્યૈ પરસ્યૈ નમઃ ।

હનૂમત્-સ્વામિન્યૈ નમઃ ।

હૃદ્યાયૈ નમઃ ।

હૃદય-સ્થાયૈ નમઃ ।

હતાશુભાયૈ નમઃ ।

હંસ-યુક્તાયૈ નમઃ ।

હંસ-ગતયે નમઃ ।

હર્ષ-યુક્તાયૈ નમઃ ।

હતાશરાયૈ નમઃ ।

સાર-રૂપાયૈ નમઃ ।

સાર-વચસે નમઃ ।

સાધ્વ્યૈ નમઃ ।

સરમા-પ્રિયાયૈ નમઃ ।

ત્રિલોક-વન્દ્યાયૈ નમઃ ।

ત્રિજટા-સેવ્યાયૈ નમઃ ।

ત્રિપથ-ગાર્ચિન્યૈ નમઃ ।

ત્રાણ-પ્રદાયૈ નમઃ ।

ત્રાત-કાકાયૈ નમઃ ।

તૃણી-કૃત-દશાનનાયૈ નમઃ ।

અનસૂયા-અઙ્ગરાગાઙ્કાયૈ નમઃ ।

અનસૂયાયૈ નમઃ ।

સૂરિ-વન્દિતાયૈ નમઃ ।

અશોક-વનિકા-સ્થાનાયૈ નમઃ ।

અશોકાયૈ નમઃ ।

શોક-વિનાશિન્યૈ નમઃ ।

સૂર્ય-વંશ-સ્નુષાયૈ નમઃ ।

સૂર્ય-મણ્ડલાન્તસ્સ્થ-વલ્લભાયૈ નમઃ ।

શ્રુત-માત્રાઘ-હરણાયૈ નમઃ ।

શ્રુતિ-સન્નિહિતેક્ષણાયૈ નમઃ ।

પુષ્પ-પ્રિયાયૈ નમઃ ।

પુષ્પક-સ્થાયૈ નમઃ ।

પુણ્ય-લભ્યાયૈ નમઃ ।

પુરાતનાયૈ નમઃ ।

પુરુષાર્થ-પ્રદાયૈ નમઃ ।

પૂજ્યાયૈ નમઃ ।

પૂત-નામ્ને નમઃ ।

પરન્તપાયૈ નમઃ ।

પદ્મ-પ્રિયાયૈ નમઃ ।

પદ્મ-હસ્તાયૈ નમઃ ।

પદ્માયૈ નમઃ ।

પદ્મ-મુખ્યૈ નમઃ ।

શુભાયૈ નમઃ ।

જન-શોક-હરાયૈ નમઃ ।

જન્મ-મૃત્યુ-શોક-વિનાશિન્યૈ નમઃ ।

જગદ્-રૂપાયૈ નમઃ ।

જગદ્-વન્દ્યાયૈ નમઃ ।

જય-દાયૈ નમઃ ।

જનકાત્મજાયૈ નમઃ ।

નાથનીય-કટાક્ષાયૈ નમઃ ।

નાથાયૈ નમઃ ।

નાથૈક-તત્પરાયૈ નમઃ ।

નક્ષત્ર-નાથ-વદનાયૈ નમઃ ।

નષ્ટ-દોષાયૈ નમઃ ।

નયાવહાયૈ નમઃ ।

વહ્નિ-પાપ-હરાયૈ નમઃ ।
વહ્નિ-શૈત્ય-કૃતે નમઃ ।
વૃદ્ધિ-દાયિન્યૈ નમઃ ।
વાલ્મીકિ-ગીત-વિભવાયૈ નમઃ ।
વચોતીતાયૈ નમઃ ।
વરાઙ્ગનાયૈ નમઃ ।
ભક્તિ-ગમ્યાયૈ નમઃ ।
ભવ્ય-ગુણાયૈ નમઃ ।
ભાત્ર્યૈ નમઃ ।
ભરત-વન્દિતાયૈ નમઃ ।
સુવર્ણાઙ્ગ્યૈ નમઃ ।
સુખકર્યૈ નમઃ ।
સુગ્રીવાઙ્ગદ-સેવિતાયૈ નમઃ ।
વૈદેહ્યૈ નમઃ ।
વિનતાઘૌઘ-નાશિન્યૈ નમઃ ।
વિધિ-વન્દિતાયૈ નમઃ ।
લોક-માત્રે નમઃ ।
લોચનાન્ત-સ્થિત-કારુણ્ય-સાગરાયૈ નમઃ ।
કૃતાકૃત-જગદ્ધેતવે નમઃ ।
કૃત-રાજ્યાભિષેકકાયૈ નમઃ । ૧૦૮
ઇદં અષ્ટોત્તર શતં સીતા -નામ્નાં તુ યા વધૂઃ ।
ભક્તિ-યુક્તા પઠેત્ સા તુ પુત્ર-પૌત્રાદિ-નન્દિતા ॥

ધન-ધાન્ય-સમૃદ્ધા ચ દીર્ઘ-સૌભાગ્ય-દર્શિની ।
પુંસાં અપિ સ્તોત્રં ઇદં પઠનાત્ સર્વ-સિદ્ધિ-દમ્ ॥

॥ ઇતિ બ્રહ્મયામલે રામરહસ્યે પ્રોક્તા શ્રી-સીતા-અષ્ટોત્તરશત-નામાવલિઃ સમ્પૂર્ણા ॥

## ॥ અથ શ્રીહનુમદષ્ટોત્તરશત-નામાવલિઃ ॥

હનુમતે નમઃ ।
અઞ્જના-સૂનવે નમઃ ।
ધીમતે નમઃ ।

કેસરિ-નન્દનાય નમઃ ।

વાતાત્મજાય નમઃ ।

વર-ગુણાય નમઃ ।

વાનરેન્દ્રાય નમઃ ।

વિરોચનાય નમઃ ।

સુગ્રીવ-સચિવાય નમઃ ।

શ્રીમતે નમઃ । ૧૦

સૂર્ય-શિષ્યાય નમઃ ।

સુખ-પ્રદાય નમઃ ।

બ્રહ્મ-દત્ત-વરાય નમઃ ।

બ્રહ્મ-ભૂતાય નમઃ ।

બ્રહ્મર્ષિ-સન્નુતાય નમઃ ।

જિતેન્દ્રિયાય નમઃ ।

જિતારાતયે નમઃ ।

રામ-દૂતાય નમઃ ।

રણોત્કટાય નમઃ ।

સઞ્જીવની-સમાહર્ત્રે નમઃ । ૨૦

સર્વ-સૈન્ય -પ્રહર્ષકાય નમઃ ।

રાવણાકમ્પ્ય-સૌમિત્રિ-નયન-સ્ફુટ-ભક્તિમતે નમઃ ।

અશોક-વનિકા-ચ્છેદિને નમઃ ।

સીતા-વાત્સલ્ય-ભાજનાય નમઃ ।

વિષીદદ્-ભૂમિ-તનયાર્પિત-રામાઙ્ગુલીયકાય નમઃ ।

ચૂડામણિ-સમાનેત્રે નમઃ ।

રામ-દુઃખાપહારકાય નમઃ ।

અક્ષ-હન્ત્રે નમઃ ।

વિક્ષતારયે નમઃ ।

તૃણીકૃત-દશાનનાય નમઃ । ૩૦

કુલ્યા-કલ્પ-મહામ્ભોધયે નમઃ ।

સિંહિકા-પ્રાણ-નાશનાય નમઃ ।

સુરસા-વિજયોપાય-વેત્ત્રે નમઃ ।

સુર-વરાર્ચિતાય નમઃ ।

જામ્બવન્નુત-માહાત્મ્યાય નમઃ ।

જીવિતાહત-લક્ષ્મણાય નમઃ ।

જમ્બુમાલિ-રિપવે નમઃ ।

જમ્ભ-વૈરિ-સાધ્વસ-નાશનાય નમઃ ।

અસ્ત્રાવધ્યાય નમઃ ।

રાક્ષસારયે નમઃ ।   ૪૦

સેનાપતિ-વિનાશનાય નમઃ ।

લઙ્કાપુર-પ્રદગ્ધ્રે નમઃ ।

વાલાનલ-સુશીતલાય નમઃ ।

વાનર-પ્રાણ-સન્દાત્રે નમઃ ।

વાલિ-સૂનુ-પ્રિયઙ્કરાય નમઃ ।

મહારૂપ-ધરાય નમઃ ।

માન્યાય નમઃ ।

ભીમાય નમઃ ।

ભીમ-પરાક્રમાય નમઃ ।

ભીમ-દર્પ-હરાય નમઃ ।   ૫૦

ભક્ત-વત્સલાય નમઃ ।

ભત્સિતાશરાય નમઃ ।

રઘુ-વંશ-પ્રિય-કરાય નમઃ ।

રણ-ધીરાય નમઃ ।

રયાકરાય નમઃ ।

ભરતાર્પિત-સન્દેશાય નમઃ ।

ભગવચ્છિલષ્ટ-વિગ્રહાય નમઃ ।

અર્જુન-ધ્વજ-વાસિને નમઃ ।

તર્જિતાશર-નાયકાય નમઃ ।

મહતે નમઃ ।   ૬૦

મહા-મધુર-વાચે નમઃ ।

મહાત્મને નમઃ ।

માતરિશ્વ-જાય નમઃ ।

મરુન્નુતાય નમઃ ।

મહોદાર-ગુણાય નમઃ ।

મધુ-વન-પ્રિયાય નમઃ ।

મહા-ધૈર્યાય નમઃ ।

મહા-વીર્યાય નમઃ ।
મિહિરાધિક-કાન્તિમતે નમઃ ।
અન્નદાય નમઃ । ૭૦
વસુદાય નમઃ ।
વાગ્મિને નમઃ ।
જ્ઞાન-દાય નમઃ ।
વત્સલાય નમઃ ।
વશિને નમઃ ।
વશીકૃતાખિલ-જગતે નમઃ ।
વરદાય નમઃ ।
વાનરાકૃતયે નમઃ ।
ભિક્ષુ-રુપ-પ્રતિચ્છન્નાય નમઃ ।
અભીતિ-દાય નમઃ । ૮૦
ભીતિ-વર્જિતાય નમઃ ।
ભૂમી-ધર-હરાય નમઃ ।
ભૂતિ-દાયકાય નમઃ ।
ભૂત-સન્નુતાય નમઃ ।
ભુક્તિ-મુક્તિ-પ્રદાય નમઃ ।
ભૂમ્ને નમઃ ।
ભુજ-નિર્જિત-રાક્ષસાય નમઃ ।
વાલ્મીકિ-સ્તુત-માહાત્મ્યાય નમઃ ।
વિભીષણ-સુહૃદે નમઃ ।
વિભવે નમઃ । ૯૦
અનુકમ્પા-નિધયે નમઃ ।
પમ્પા-તીર-ચારિણે નમઃ ।
પ્રતાપવતે નમઃ ।
બ્રહ્માસ્ત્ર-હત-રામાદિ-જીવનાય નમઃ ।
બ્રહ્મ-વત્સલાય નમઃ ।
જય-વાર્તાહરાય નમઃ ।
જેત્રે નમઃ ।
જાનકી-શોક-નાશનાય નમઃ ।
જાનકી-રામ-સાહિત્ય-કારિણે નમઃ ।

જન-સુખ-પ્રદાય નમઃ ।
બહુ-યોજન-ગન્ત્રે નમઃ ।
બલ-વીર્ય-ગુણાધિકાય નમઃ ।
રાવણાલય-મર્દિને નમઃ ।
રામ-પાદાબ્જ-વાહકાય નમઃ ।
રામ-નામ-લસદ્-વક્ત્રાય નમઃ ।
રામાયણ-કથાદૃતાય નમઃ ।
રામ-સ્વરૂપ-વિલસન્માનસાય નમઃ ।
રામ-વલ્લભાય નમઃ । ૧૦૮
ઇત્થં અષ્ટોત્તર-શતં નામ્નાં વાતાત્મજસ્ય યઃ ।
અનુસન્ધ્યં પઠેત્ તસ્ય મારુતિઃ સમ્પ્રસીદતિ ।
પ્રસન્ને મારુતૌ રામો ભુક્તિ-મુક્તી પ્રયચ્છતિ ॥

॥ ઇતિ બ્રહ્મયામલે રામરહસ્યે પ્રોક્તા
શ્રી હનુમદ્-અષ્ટોત્તરશતનામાવલિઃ સમ્પૂર્ણા ॥

વનસ્પતિ-રસોદ્ભૂતો ગન્ધાઢ્યો ધૂપ ઉત્તમઃ ।
રામચન્દ્ર મહીપાલ ધૂપોઽયં પ્રતિગૃહ્યતામ્ ॥

સપરિવારાય શ્રીરામાય નમઃ-ધૂપં આઘ્રાપયામિ ।
જ્યોતિષાં પતયે તુભ્યં નમો રામાય વેધસે ।
ગૃહાણ મઙ્ગલં દીપં ત્રૈલોક્ય-તિમિરાપહમ્ ॥

સપરિવારાય શ્રીરામાય નમઃ-અલઙ્કારદીપં સન્દર્શયામિ ।
ૐ ભૂર્ભુવસ્સુવઃ ઇત્યાદિ બ્રહ્મણે સ્વાહા ।
ઇદં દિવ્યાન્નં અમૃતં રસૈઃ ષડ્ભિઃ સમન્વિતમ્ ।
રામચન્દ્રેશ નૈવેદ્યં સીતેશ પ્રતિગૃહ્યતામ્ ॥

સપરિવારાય શ્રીરામાય નમઃ-નૈવેદ્યં નિવેદયામિ ।
મધ્યે મધ્યે પાનીયં સમર્પયામિ ।
નિવેદનોત્તરં આચમનીયં સમર્પયામિ ।
નાગવલ્લી-દલૈ-ર્યુક્તં પૂગી-ફલ-સમન્વિતમ્ ।
તામ્બૂલં ગૃહ્યતાં રામ કર્પૂરાદિ-સમન્વિતમ્ ॥

સપરિવારાય શ્રીરામાય નમઃ-કર્પૂરતામ્બૂલં સમર્પયામિ ।
મઙ્ગલાર્થં મહીપાલ નીરાજનમિદં હરે ।

સઙ્ગૃહાણ જગન્નાથ રામચન્દ્ર નમોઽસ્તુ તે ॥

સપરિવારાય શ્રીરામાય નમઃ ।
સમસ્ત-અપરાધ ક્ષમાપણાર્થં સમસ્ત-દુરિત-ઉપશાન્ત્યર્થં
સમસ્ત-સન્મઙ્ગલ-અવાપ્ત્યર્થં કર્પૂર-નીરાજનં દર્શયામિ
રક્ષાં ધારયામિ ।
કલ્પવૃક્ષ સમુદ્ભુતૈઃ પુરુહૂતાદિભિઃ સુમૈઃ ।
પુષ્પાઞ્જલિં દદામ્યદ્ય પૂજિતાય આશર-દ્વિષે ॥

સપરિવારાય શ્રીરામાય નમઃ-મન્ત્ર-પુષ્પં સમર્પયામિ ।
મન્દાકિની-સમુદ્ભૂત-કાઞ્ચનાબ્જ-સ્રજા વિભો ।
સમ્માનિતાય શક્રેણ સ્વર્ણ-પુષ્પં દદામિ તે ॥

સપરિવારાય શ્રીરામાય નમઃ-સ્વર્ણ-પુષ્પં સમર્પયામિ ।
ચરાચરં વ્યાપ્નુવન્તં અપિ ત્વાં રઘુ-નન્દન ।
પ્રદક્ષિણં કરોમ્યદ્ય મદ મૂર્તિ-સંયુતમ્ ॥

સપરિવારાય શ્રીરામાય નમઃ-પ્રદક્ષિણં કરોમિ ।
ધ્યેયં સદા પરિભવ-ઘ્નં અભીષ્ટ-દોહં
તીર્થાસ્પદં શિવ-વિરિઞ્ચિ-નુતં શરણ્યમ્ ।
ભૃત્યાર્તિ-હં પ્રણત-પાલ-ભવાબ્ધિ-પોતં
વન્દે મહાપુરુષ તે ચરણારવિન્દમ્ ॥

ત્યક્ત્વા સુદુસ્ત્યજ-સુરેપ્સિત-રાજ્ય-લક્ષ્મીં
ધર્મિષ્ઠ આર્ય-વચસા યદગાદરણ્યમ્ ।
માયા-મૃગં દયિતયેપ્સિતં અન્વધાવત્
વન્દે મહાપુરુષ તે ચરણારવિન્દમ્ ॥

સાઙ્ગોપાઙ્ગાય સારાય જગતાં સનકાદિભિઃ ।
વન્દિતાય વરેણ્યાય રાઘવાય નમો નમઃ ॥

સપરિવારાય શ્રીરામાય નમઃ-નમસ્કારાન્ સમર્પયામિ ।
ત્વમક્ષરોઽસિ ભગવન્ વ્યક્તાવ્યક્ત-સ્વરૂપ-ધૃત્ ।
યથા ત્વં રાવણં હત્વા યજ્ઞ -વિઘ્ન-કરં ખલમ્ ।
લોકાન્ રક્ષિતવાન્ રામ તથા મન્માનસાશ્રયમ્ ॥ ૧॥

રજસ્તમશ્ચ નિર્હત્ય ત્વત્પૂજાલસ્ય-કારકમ્ ।

સત્ત્વં ઉદ્રેચય વિભો ત્વત્પૂજાદર-સિદ્ધયે ॥ ૨॥

વિભૂતિં વર્ષય ગૃહે પુત્રપૌત્રાભિવૃદ્ધિકૃત્ ।
કલ્યાણં કુરુ મે નિત્યં કૈવલ્યં દિશ ચાન્તતઃ ॥ ૩॥

વિધિતોઽવિધિતો વાઽપિ યા પૂજા ક્રિયતે મયા ।
તાં ત્વં સન્તુષ્ટહૃદયો યથાવદ્વિહિતામિવ ॥ ૪॥

સ્વીકૃત્ય પરમેશાન માત્રા મે સહ સીતયા ।
લક્ષ્મણાદિભિરપ્યત્ર પ્રસાદં કુરુ મે સદા ॥ ૫॥

પ્રાર્થનાઃ સમર્પયામિ ॥

કાયેન વાચા મનસેન્દ્રિયૈર્વા
બુદ્ધ્યાઽઽત્મના વા પ્રકૃતેઃ સ્વભાવાત્ ।
કરોમિ યદ્યત્ સકલં પરસ્મૈ
નારાયણાયેતિ સમર્પયામિ ॥

અનયા પૂજયા શ્રી-સીતા-લક્ષ્મણ-ભરત-શત્રુઘ્ન-હનુમત્-સમેત-
શ્રી-રામચન્દ્રઃ પ્રીયતામ્ ।
તત્સદ્બ્રહ્માર્પણમસ્તુ ।

## શ્રીમત્ હનુમત્કૃતં શ્રી-સીતા-રામ-સ્તોત્રમ્

અયોધ્યા-પુર-નેતારં મિથિલા-પુર-નાયિકામ્ ।
ઇક્ષ્વાકૂણાં અલઙ્કારં વૈદેહાનાં અલઙ્ક્રિયામ્ ॥ ૧॥

રઘૂણાં કુલ-દીપં ચ નિમીનાં કુલ-દીપિકામ્ ।
સૂર્ય વંશ-સમુદ્ભુતં સોમવંશ-સમુદ્ભવામ્ ॥ ૨॥

પુત્રં દશરથસ્યાપિ પુત્રીં જનક-ભૂપતેઃ ।
વસિષ્ઠ-અનુમતાચારં શતાનન્દ-મતાનુગામ્ ॥ ૩॥

કૌસલ્યા-ગર્ભ-સમ્ભૂતં વેદિ-ગર્ભોદિતાં સ્વયમ્ ।
પુણ્ડરીક-વિશાલાક્ષં સ્ફુરદ્-ઇન્દીવરેક્ષણામ્ ॥ ૪॥

ચન્દ્ર-કાન્ત-આનનામ્ભોજં ચન્દ્રબિમ્બ-ઉપમાનનામ્ ।
મત્ત-માતઙ્ગ-ગમનં મત્ત-સારસ-ગામિનીમ્ ॥ ૫॥

ચન્દનાર્દ્ર-ભુજા-મધ્યં કુઙ્કુમાક્ત-કુચ-સ્થલીમ્ ।

ચાપાલઙ્કૃત-હસ્તાબ્જં પદ્માલઙ્કૃત-પાણિકામ્ ॥ ૬॥

શરણાગતગોમારં પ્રણિપાતપ્રસાદિકામ્ ।
તાલી-દલ-શ્યામલાઙ્ગં તપ્ત-ચામીકર-પ્રભામ્ ॥ ૭॥

દિવ્ય-સિંહાસનારૂઢં દિવ્ય-સ્રગ્-વસ્ત્ર-ભૂષણામ્ ।
અનુક્ષણં કટાક્ષાભ્યાં અન્યોન્ય-ઈક્ષણ-કાઙ્ક્ષિણૌ ॥ ૮॥

અન્યોન્ય-સદૃશાકારૌ ત્રૈલોક્ય-ગૃહ-દમ્પતી ।
ઇમૌ યુવાં પ્રણમ્યાહં ભજામ્યદ્ય કૃતાર્થતામ્ ॥ ૯॥

અનયા સ્તોતિ યઃ સ્તુત્યા રામં સીતાં ચ ભક્તિતઃ ।
તસ્ય તૌ તનુતાં પ્રીતૌ સમ્પદઃ સકલા અપિ ॥ ૧૦॥

ઇતીદં રામચન્દ્રસ્ય જાનક્યાશ્ચ વિશેષતઃ ।
કૃતં હનુમતા પુણ્યં સ્તોત્રં સદ્યો વિમુક્તિ-દમ્ ।
યઃ પઠેત્પ્રાતરુત્થાય સર્વાન્ કામાનવાપ્નુયાત્ ॥ ૧૧॥

ઇતિ શ્રીમત્ હનુમત્કૃતં શ્રી-સીતા-રામ-સ્તોત્રમ્ સમ્પૂર્ણમ્ ।

This is based on Rama Bhakti Kalpa Lata published in Kalyabda 5026 (1924)by Valangaiman Subrahmanya Shastrigal, with some parts supplemented froM Rama Navami Puja of Vrata Raja published by Khemraj Krishnadas, Mumbai in Kalyabda 5085 (1984).

Proofread by Rajesh Tyagarajan

*Shrirama Puja*
pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*